NANDADULAL MANDAL

**Assistant Professor**

**Department of Education**

**WhatsApp No-9533608266, Contact No-8617528423**

**Mail id-nandadulalmandal38@gmail.com**

**21.04.2020, 5th Period, 5th Paper, 3rd Unit, 3.2**

# -समावेशितशिक्षा-

## *।।कक्षायां विशेषावश्यकतानां पूर्तये अपेक्षिताः सहकारिसेवायां परामर्शस्य प्रयोजनिताः।।*

विशिष्टबालकानां निर्देशनपरामर्शः शिक्षायाम् अत्यावश्यकं भवति। यतोहि परामर्शः सैव व्यवस्था येन शारीरिकिमानसिकरुपेण च विशेषरुपेण सक्षमबालानां शिक्षा प्रशिक्षणं च यथार्थं भवितुं शक्यते। सामान्यतः विशिष्टबालकः शारीरिकं, मानसिकं, वौद्धिकं, पश्चवर्ती, असमायोजितं, प्रतीभाशालिनश्च भवन्ति। एतेषां कृते शैक्षिकं व्यावसायिकं च निर्देशनम् अपेक्षते।

निर्देशनम् इति शब्दः सर्वेषां सेवायाः द्योतकं भवति। येन अधोलिखितयोग्यतानां विकासं भवति।

1.सोद्यश्यनिर्धारणे सहाय्यतां प्रददाति।

2.पूर्णोद्देश्यप्राप्तये निम्नलिखितविषयेषु ध्यानं दातव्यम्-

A.निर्देशनम् व्यक्तेः आत्मज्ञानप्राप्तये सहायतां प्रयच्छति।

B.समाजानुगुणं प्रत्येकस्यां व्याक्तौ रुचेः, इच्छायाः च जागरणीयम्।

C. उचितसम्प्राप्तेः चैतन्योदयसम्पादनम्।

D.स्ववातावरणसम्पर्के सचेतनं करणीयम्।

E. अत्यधिकानुभवप्रदानम्

F.उद्देश्यप्राप्तये अत्याधिकावसरप्रदानम्.

विशिष्टबालकानां शैक्षिकं व्यावसायिकं च निर्देशनं दातव्यम्। किञ्च शैक्षिकप्रामूख्यं भजते। तत्रैव सर्वं सन्निहितं वर्तते। उभयोः शिक्षाप्रदानाय विद्यालयः प्रमूखं स्थानं वर्तते। विशिष्टबालानां निर्देशनं सामुहिकं न भूत्वा व्यैक्तिकं भवेत्। वस्तुतोहि भिन्नभिन्नविशिष्टबालकेषु आवश्यकतामपि भिन्नं भिन्नं भवन्ति। निर्देशनम् एतादृशं भवेत्। यथा-

1.तेषामेव निर्देशनं दातव्यं ये तावत् विद्यालये आगच्छन्ति।

2. विद्यालयः निर्देशनसेवां नेतुं बहिष्ठात् निर्देशकम् आनेतुं शक्यते।

3.विद्यालयः सैव सामग्रीणां उपकरणानां सहाय्यं नेतुं शक्यते यत् उपलब्धम् आवश्यकं च भवति।

**निर्देशनं तथा व्यक्तित्वविकासम्-**

व्यक्तेः समीचीनं जीवनं तस्य व्यक्तित्वस्योपरि भवति। निर्देशनेन विशिष्टबालकानां व्यक्तित्वस्य विकासं सम्यक् भवितुं शक्यते। अतः विशिष्टबालकस्य आवश्यकतां निर्देशनस्य आवश्यकतां च यथार्थं ज्ञातव्यम्। मानकव्यक्तविकासाय आवश्यकं भवति –सुरक्षा, स्वतन्त्रता, तथा च आत्मप्रदर्शनाय यथार्थं सन्तुलनम्। अतः व्यक्तित्वस्य विकासं भवेत्। तत्र तावत् ध्यतव्यानि –

1.शारीरिकाक्षमतां स्वीकरणम्.

2.स्वतन्त्रव्यक्तित्वस्य विकासम्।

3.सुरक्षा

4.आत्मविश्वासः

5.आत्मप्रदरशनस्य क्षमता उपयुक्तशिक्षा च

6.कस्याऽपि कार्य-व्यवसाय-वृत्तिः च प्राप्तये योग्यता उत्पादनम् इत्यादि।

**अक्षमबालकाय विशेषनिर्देशनम्-**

अक्षमबालकः विविधप्रकाराः भवन्ति। निर्देशनात् प्राक् एतत् निर्धारणम् आवश्यकं यत् बालकस्य कीदृशाक्षमता वर्तते इति। शारीरिकाक्षमबालकं विद्यालये निर्धारणे आक्षमे सति वैद्यपार्श्वे प्रेषणियं भवति। एतेषां विशिष्टबालानां निर्देशनाय बालकः विद्यालये अवश्यं भाव्यमिति। एतेषां निर्धारणसमये केचन ध्यातव्यविन्दवः तावत्-

1.विशिष्टबालकानां कृते तादृशमेव कार्यं देयं यत् सामान्यबालकः सदृशं कर्तुं शक्नुयात्।

2.अक्षमबालकस्य कार्यस्य सफलतायां प्रसन्नता प्रकटनं तथा च तत् स्वीकारं करणीयम्।

3.बालकेन गतिविषयकं,सामाजिककौशलं तथा च अन्ययोग्यताश्रीतकार्यं सम्पादनीयम्।

4.एतेषां बालानां वातावरणं नियन्त्रणं स्यात्।

5.सहनशीलता,प्रसन्नता,रुचि आदि गुणानां परीक्षणं करणीयम्।

6.बालकानां पितरौ विशेष निर्देशनं दातव्यं भवति। यस्मात् तौ बालकस्य आवश्यकतां अनुभवेताम्।

निर्देशनस्य मुख्यमुद्देश्यं बालकस्य सोद्देश्यनिर्धारणे योग्यता उत्पादनीया। तथा च व्यक्तिः स्ववातावरणविषये जानियात्। यतोहि अक्षमबालकस्य योग्यता सीमितं भवति। अतः अक्षमबालः स्वयं जानियात् यत् तयि कीयत् ज्ञानं वर्तते। एवं च ज्ञाने सति विशिष्टबालकः योग्यतानुगुणं सोद्देश्यनिर्धारणं कर्तुं शक्नुयात्।

**परामर्शदाता**

विशिष्टबालकस्य विकासाय कुशलपरामर्श अपेक्षते। अक्षमतायाः काठिन्यानुसारेण परामर्श आंशिकं पूर्णं वा भवितुं शक्यते। परामर्शदाता विशिष्टबालकस्य वातावरणम् अवगत्य समायोजनायां प्रयत्नशीलं भवेत्। एतदर्थं आवश्यककर्तव्यानि- 1.विद्यालयस्य परिवारस्य च वातावरणविषये पूर्णज्ञानं स्यात्।

2. विशिष्टबालकस्य क्षमताः सम्भावनाः च जानीयात्।

3. तेषां सीमापि अवगच्छेत्।

4.व्यैयक्तिकेतिहासम् अध्ययनं स्यात्।

5.विद्यालयीय कार्यक्रमेषु परिमार्जनं कुर्यात्।

6.विद्यालयात् बहिः उपलव्धसौविध्येभ्यः लाभं सम्पादयेत्।

7.शैक्षिकं व्यावसायिकं च परामर्शः न केवलं विशिष्टबालकेभ्यः अपि च तेषां पितृणाम्, अभिभावकानामपि प्रदानं कुर्यात्।

प्रतिभाशालीबालकेभ्यः समयानुगुणं परामर्शः दातव्यः तथा च शारीरिक-मानसिकस्वास्थ्यपरीक्ष्य तेषां पूर्णमनोवृत्तेः अध्ययनं स्यात्। मूख्यज्ञातव्यबिन्दुः तावत्-

1.शारीरिकं/मानसिकदोषाणाम् इतिहासं ज्ञातव्यम्।

2.अभिभावकानां वातावरणविषये ज्ञानं स्यात्।

3.एतेषां बालकानां क्षमतां सम्भावनां च अवगच्छेत्।

4. विशेषविद्यालये एतेषां परिमार्जनाय व्यवस्था करणीया।

5.विद्यालयस्य कार्यक्रमेषु परिवर्तनं भवेत्।

6.अक्षमबालकानां रुचेः, अभिवृत्तीनां च अध्ययनं कुर्यात्।

**शैक्षिकं व्यावसायिकं च निर्देशनम्-**

शैक्षिकं व्यावसायिकं च निर्देशननिमित्तं विशेषसंस्था भवेत्। संस्थाद्वारा निर्देशनाय प्रदत्त्यानि सोपानि यथा-

1.**विशिष्टबालकस्य निर्धारणम्-** एतदर्थं अध्यापकः अन्यसंस्थाभ्यः सहाय्यतां स्वीकुर्यात्। यथ-शैक्षिकसंस्थाः, स्वास्थ्यसंस्था, समाजकल्यानसंस्थाभ्यः सेवां प्राप्तुं शक्यते।

2.**वैद्यीयपरीक्षा-** बालकस्य सम्यक् परीक्षणं स्यात्। एतस्मात् कस्य बालकस्य कीदृशविषयः एवं च कीदृशी वृत्तिः अपेक्षते तत् ज्ञातुं शक्यते।

3.**शारीरिकपुनःस्थापनाः-** यदि शारीरिकाक्षमता दूरीकर्तुं शक्यते तर्हि तत् दूरीकृत्य शैक्षिकं व्यावसायिकं निर्देशनं दद्यात्।

4.**परामर्शः-** परामर्शः निर्देशनसेवायाः केन्द्रबिन्दुः भवति। एतस्मात् पुनःस्थापना न भवितुं शक्यते। परामर्शः आद्याभ्यं अन्तं यावत् भवेत्। परामर्शद्वारा व्यक्तेः न्यूनता विषयम् अवगत्य तत् दूरीकर्तुं प्रयतते।

5.**व्यावसायिकशिक्षणम्-** विशिष्टबालकस्य उत्तमवृत्तिप्राप्तये व्यावसायिकप्रशिक्षणस्य प्रवन्धनम् अपेक्षते। माध्यमिकविद्यालयेषु व्यावसायिकप्रशिक्षणसमये अक्षमबालानां पूर्णलाभः स्यात्।

6.**आवश्यकपूरकं सेवा-** आवश्यकजीवनसम्बन्धी उपदेशः, प्रशिक्षणसम्बन्धिसामग्री तथा च व्यावसायिकप्रशिक्षणाय यानि यानि आवश्यकानि भवन्ति।

7.**व्यवसायस्थापनम्-** व्यवसाये नियोजने सति व्यवसायस्थापनं भवति। तत्र तु द्रष्टव्यं सामर्थानुसारं व्यवसायं भवेत्। ततः विशिष्टबालकः पूर्णलाभः नेतुं शक्नुयात्।

8. **अनुसरणसेवा(Follow up)-** अयं तावत् श्रेष्ठनिर्देशनम्।यतोहि अस्य सीमा उद्योगप्राप्तिपर्यन्तमेव नास्ति अपि तु ततः परं वृत्तेः सन्तुष्टम् अस्ति वा नास्ति इत्यादयः पर्यवेक्षणं करोति।

एवमेव निर्देशनं विशिष्टबालानां विकासे समायोजने च सहायतां प्रदीयते। एतत् निर्देशनम् अध्यापकः, प्रधानाचार्यः, उत् विशेषरुपेण नियुक्तनिर्देशनकर्मचारिनः दातुं शक्यन्ते। विद्यालयेभ्यः सामाजिकसंस्थाभ्यः निर्देशनमपि नेतुं शक्यते। एतत् अतिरीच्य सर्वकारेण अक्षमबालकानां कृते भिन्नतया निर्देशनसंस्था उद्घटयेत्। तथा च समाजे जागरणं प्रसरेत्।ते तावत्-

1.विशेषरुपेण सक्षमबालानां योग्यतानां विस्तृतप्रचारप्रसारं स्यात्।

2.शारीरिकावश्यकतानुगुणं सहायकोपकरणानि-द्विचक्रीकायानं, उपनेत्रम् इत्यादि प्रयच्छेत्।

3.अभिभावकेभ्यः सूचयेत् यत् तेषां विशिष्टबालानां विशेषप्रशिक्षणं शिक्षा च दद्यात्।

एवं क्रमेण परामर्शः विशिष्टबालकेभ्यः उपकारं करोति।

END